योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ११०

दशोत्तरशततमः सर्गः ११०

श्रीवसिष्ठ उवाच ।

परमात्कारणादादौ चिच्चेत्यपदपातिनी ।

कलनापदमासाद्य कला कलिलतां गता ।। १

असत्स्वेव विमोहेषु रामैवंप्रायवृत्तिषु ।

घनेषु तुच्छतामेत्य चिराय परिमूर्च्छति ।। २

असदेव मनोवृत्तिर्म्लाना विस्तारयत्यलम्।

दुःखं दोषसहस्रेण वेतालानिव बालिका ।। ३

सदेव हि महादुःखमसत्तां नयति क्षणात् ।

निष्कलङ्का मनोवृत्तिरन्धकारमिवार्करुक् ।। ४

नयत्यभ्याशतां दूरं दूरमभ्याशतां नयेत् ।

मनो वल्गति भूतेषु बालो बालखगेष्विव ।। ५

अभयं भयमज्ञस्य चेतसो वासनावतः ।

दूरतो मुग्धपान्थस्य स्थाणुर्याति पिशाचताम् ।। ६

शत्रुत्वं शङ्कते मित्रे कलङ्कमलिनं मनः ।

मदाविष्टमतिर्जन्तुर्भ्रमत्पश्यति भूतलम् ।। ७

पर्याकुले हि मनसि शशिनो जायतेऽशनिः ।

अमृतं विषभावेन भुक्तं याति विषक्रियाम् ।। ८

सुरपत्तननिर्माणमसत्सदिव पश्यति ।

वासनावलितं चेतः स्वप्नवज्जाग्रदेव हि ।। ९
मोहैककारणं जन्तोर्मनसो वासनोल्वणा ।
उत्खातव्या प्रयत्नेन मूलोच्छेदेन सैव च ।। १०
वासनावागुराकृष्टो मनोहरिणको नृणाम् ।
परां विवशतामेति संसारवनगुल्मके ।। ११
येन च्छिन्ना विचारेण जीवस्य ज्ञेयवासना ।
निरभ्रस्येव सूर्यस्य तस्यालोको विराजते ।। १२
अतस्त्वं मन एवेदं नरं विद्धि न देहकम् ।
जडो देहो मनश्चात्र न जडं नाजडं विदुः ।। १३
यत्कृतं मनसा तात तत्कृतं विद्धि राघव ।
यत्त्यक्तं मनसा तावत्तत्त्यक्तं विद्धि चानघ ।। १४
मनोमात्रं जगत्कृत्स्नं मनः पर्यन्तमण्डलम् ।
मनो व्योम मनो भूमिर्मनो वायुर्मनो महान् ।। १५
मनो यदि पदार्थे तु तद्भावेन न योजयेत् ।
ततः सूर्योदयेऽप्येते न प्रकाशाः कदाचन ।। १६
मनो मोहमुपादत्ते यस्यासौ मूढ उच्यते ।
शरीरे मोहमापन्ने न शवो मूढ उच्यते ।। १७
मनः पश्य भवत्यक्षि श्रृण्वच्छ्रवणतां गतम् ।
त्वग्भावं स्पर्शनादेति घ्राणतामेति जिघ्रणात् ।। १८
रसनाद्रसतामेति विचित्रास्तत्र वृत्तिषु ।
नाटके नूटवद्देहे मन एवानुवर्तते ।। १९
लघु दीर्घं करोत्येव सत्येऽसत्तां प्रयच्छति ।
कटुतां नयति स्वादु रिपुं नयति मित्रताम् ।। २०
य एव प्रतिभासोऽस्य चेतसो वृत्तिवर्तिनः ।
ततस्तदेव प्रत्यक्षं तथात्रानुभवादिह ।। २१
प्रतिभासवशादेव स्वप्नाकुलितचेतसः ।

हरिश्चन्द्रस्य संपन्ना रात्रिर्द्वादशवार्षिकी ।। २२

चित्तानुभाववशतो मुहूर्तत्वे गतं युगम् ।

इन्द्रद्युम्नस्य वैरिञ्च्यपुराभ्यन्तरवर्तिनः ।। २३

मनोज्ञया मनोवृत्त्या सुखतां याति रौरवम् ।

प्रातःप्राप्तव्यराज्यस्य सुबद्धस्येव बन्धनम् ।। २४

जिते मनसि सर्वैव विजिता चेन्द्रियावलिः ।

शीर्यते च यथा तन्तौ दग्धे मौक्तिकमालिका ।। २५

सर्वत्र स्थितया स्वच्छरूपया निर्विकारया ।

समया सूक्ष्मया नित्यं चिच्छक्त्या साक्षिभूतया ।। २६

सर्वभावानुगतया न चेत्यार्थविभिन्नया ।

रामात्मसत्तया मूकमपि देहसमं जडम् ।। २७

मनोऽन्तश्चलति व्यर्थं मननैषणमुह्यया ।

बहिर्गिरिसरिद्व्योमसमुद्रपुरलीलया ।। २८

जाग्रच्चाभिमतं वस्तु नयत्यमृतमृष्टताम् ।

अनीहितं च विषतां नयत्यमृतमप्यलम् ।। २९

अमृष्टसर्वभावानामलमात्मचमत्कृतिम् ।

मनः स्वाभिमताकारं रूपं सृजति वस्तुषु ।। ३०

स्पन्देषु वायुतामेति प्रकाशेषु प्रकाशताम् ।

द्रवेषु द्रवतामेति चिच्छक्तिस्फुरितं मनः ।। ३१

पृथ्व्यां कठिनतामेति शून्यतां शून्यदृष्टिषु ।

सर्वत्रेच्छास्थितिं याति चिच्छक्तिस्फुरितं मनः ।।३२

शुक्लं कृष्णीकरोत्येव कृष्णं नयति शुक्लताम् ।

विनैव देशकालाभ्यां शक्तिं पश्यास्य चेतसः ।। ३३

मनस्यन्यत्र संसक्ते चर्वितस्यापि जिह्वया ।

भोजनस्यापि मृष्टस्य न स्वादोऽस्यानुभूयते ।। ३४

यच्चित्तदृष्टं तद्दृष्टं न दृष्टं तदलोकितम् ।

अन्धकारे यथा रूपमिन्द्रियं निर्मितं तथा ।। ३५

इन्द्रियेण मनो देहि मनसेन्द्रियमुन्मनः ।

इन्द्रियाणि प्रसूतानि मनसो नेन्द्रियान्मनः ।। ३६

अत्यन्तभिन्नयोरैक्यं येषां चित्तशरीरयोः ।

ज्ञातज्ञेया महात्मानो मनस्यास्ते सुपण्डिताः ।। ३७

कुसुमोल्लासिधम्मिल्ला हेलाचलितलोचना ।

काष्ठकुड्योपमाङ्गेषु लग्नाप्यमनसोऽङ्गना ।। ३८

मनस्यन्यत्र संसक्ते वीतरागेण कानने ।

क्रव्यादचर्वितोऽङ्कस्थः स्वकरोऽपि न लक्षितः ।। ३९

सुखीकर्तुं सुदुःखानि दुःखीकर्तुं सुखानि च ।

सुखेनैवाशु युज्यन्ते मनसोऽतिशया मुनेः ।। ४०

मनस्यन्यत्र संसक्ते कथ्यमानापि यत्नतः ।

लता परशुकृत्तेव कथा विच्छिद्यते बत ।। ४१

मनस्यद्रितटारूढे गृहस्थेनापि जन्तुना ।

शुभ्राभ्रकन्दरभ्रान्तिदुःखं समनुभूयते ।। ४२

मनस्युल्लसिते स्वप्ने हृद्येव पुरपर्वताः ।

आकाश इव विस्तीर्णे दृश्यन्ते निर्मिताः क्षमाः ।। ४३

मनो विलुलिते स्वप्ने हृद्येवाद्रिपुरावलिम् ।

तनोति चलिताम्भोधिर्वीचीचयमिवात्मनि ।। ४४

अन्तरब्धिजलाद्यद्वत्तरङ्गापीडवीचयः ।

देहान्तर्मनसस्तद्वत्स्वप्नाद्रिपुरराजयः ।। ४५

अङ्कुरस्य यथा पत्रलतापुष्पफलश्रियः ।

मनसोऽस्य तथा जाग्रत्स्वप्नविभ्रमभूमयः ।। ४६

व्यतिरिक्ता यथा हेम्नो न हेमवनिता तथा ।

जाग्रत्स्वप्नक्रियालक्ष्मीर्व्यतिरिक्ता न चेतसः ।। ४७

धाराकणोर्मिफेनश्रीर्यथा संलक्ष्यतेऽम्भसः ।

तथा विचित्रविभवा नानातेयं हि चेतसः ।। ४८

स्वचित्तवृत्तिरेवेह जाग्रत्स्वप्नदृशोदितम् ।

रसावेशादुपादत्ते शैलूष इव भूमिकाम् ।। ४९

चण्डालत्वं हि लवणे प्रतिभासवशाद्यथा ।

तथेदं जगदाभोगि मनो मननमात्रकम् ।। ५०

यद्यत्संवेद्यते किंचित्तेन तेनाशु भूयते ।

मनो मनननिर्माणं यथेच्छसि तथा कुरु ।। ५१

नानापुरसरिच्छैलरूपतामेत्य देहिनाम् ।

तनोत्यन्तःस्थमेवेदं जाग्रत्स्वप्नमयं मनः ।। ५२

सुरत्वाद्दैत्यतामेत्य नागत्वान्नगतामपि ।

प्रतिभासवशाच्चित्तमापन्नं लवणो यथा ।। ५३

नरत्वादेति नारीत्वं पितृत्वात्पुत्रतां गतः ।

यथा क्षिप्रं प्रति नरः स्वसंकल्पात्तथा मनः ।। ५४

संकल्पतः प्रम्रियते संकल्पाज्जायते पुनः ।

मनश्चिरन्तनाभ्यस्ताज्जीवतामेत्यनाकृति ।। ५५

मनो मननसंमूढमूढवासनमाततम् ।

संकल्पाद्योनिमायाति सुखदुःखे भयाभये ।। ५६

सुखं दुःखं च मनसि तिले तैलमिव स्थितम् ।

तद्देशकालवशतो घनं वा तनु वा भवेत् ।। ५७

तैलं तिलस्य चाक्रान्त्या स्फुटतामेति शाश्वतीम् ।

चेतसो मननासंगाद्घनीभूते सुखासुखे ।। ५८

देशकालाभिधानेन राम संकल्प एव हि ।

कथ्यते तद्वशाद्यस्माद्देशकालौ स्थितिं गतौ ।। ५९

प्रशाम्यत्युल्लसत्येति याति नन्दति वल्गति ।

मनःशरीरसंकल्पे फलिते न शरीरकम् ।। ६०

नानास्फारसमुल्लासैः स्वसंकल्पोपकल्पितैः ।

मनो वल्गति देहेऽस्मिन्साध्वीवान्तःपुराजिरे ।। ६१

चापले प्रसरस्तस्मादन्तर्येन नदीयते ।

मनोविलयमादत्ते तस्यालान इव द्विपः ।। ६२

न स्पन्दते मनो यस्य शस्त्रस्तम्भ इवोत्तमः ।

सद्वस्तुतोऽसौ पुरुषः शिष्टाः कर्दमकीटकाः ।। ६३

यस्याचपलतां यातं मन एकत्र संस्थितम् ।

अनुत्तमपदेनासौ ध्यानेनानुगतोऽनघ ।। ६४

संयमान्मनसः शान्तिमेति संसारविभ्रमः ।

मन्दरेऽस्पन्दतां याते यथा क्षीरमहार्णवः ।। ६५

मानस्यो वृत्तयो या या भोगसंकल्पविभ्रभैः ।

संसारविषवृक्षस्य ता एवाङ्कुरयोनयः ।। ६६

चित्तं चलत्कुवलयं वलयन्त एते

मूढा महाजडजवे मदमोहमन्दाः ।

आवर्तवर्तिनि विलूनविशीर्णचिन्ता-

चक्रभ्रमे पुरुषदुर्भ्रमराः पतन्ति ।। ६७

इत्यार्षे श्रीवासिष्ठमहारामायणे मोक्षोपायेषूत्पत्तिप्रकरणे चित्तचिकित्सापूर्वकं चित्तवर्णनं नाम दशोत्तरशततमः सर्गः ।। ११० ।।